# श्रीचक्रेश्वरीस्तोत्रम्

Shri Chakreshvaristotram

sanskritdocuments.org

March 31, 2019

# Shri Chakreshvaristotram

# श्रीचक्रेश्वरीस्तोत्रम्

## Sanskrit Document Information

Text title : chakreshvarIstotram

File name : chakreshvarIstotram.itx

Category : devii, devI, jaina

Location : doc_devii

Author : Jinadattasuri

Proofread by : DPD

Latest update : March 30, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 31, 2019

*sanskritdocuments.org*

# श्रीचक्रेश्वरीस्तोत्रम्

श्रीजीनदत्तसूरिविरचितं

श्रीचक्रेश्वरि चक्रचुम्बितकरे चञ्चच्चलत्कुण्डला-
लङ्कारे कृतमस्तकोरुमुकुटे ग्रैवेयकालङ्कृते ।
स्फारोदारभुजाग्रभूषणकरे सन्नूपुरैर्बन्धुरे
मातर्मन्ति नयं स्वमिष्टविनयं त्रायस्व सन्त्रासतः ॥ १॥

श्रीचक्रेश्वरी चन्द्रमण्डलमिव ध्वस्तान्धकारोत्करं
भव्यप्राणिचकोरचुम्बितकरं सन्तापसम्पद्धरम् ।
सम्यग्दृष्टिसुखप्रदं सुविशदं कान्त्यास्पदं सम्पदां
पात्रं जीवमनःप्रसादजनकं भाति त्वदीयं मुखम् ॥ २॥

श्रीचक्रेश्वरी युष्मदाननरविं पश्यन्ति नैवोदितं
ध्वस्तध्वान्ततर्तिं प्रदत्तसुगतिं संप्राप्तमार्गस्थितिम् ।
ते ज्ञेया इह कौशिका इव जना हेयाः सतां सर्वथा
नादेयाः कुदृशो भवन्ति भगवन्युच्चैःशिव वाञ्छताम् ॥ ३॥

श्रीचक्रेश्वरी युष्मदङ्घ्रिचरितं सर्वत्र तद्विश्रुतं
कस्याज्ञस्य मनोमुदे भवति नो निष्पुण्यचूडामणेः ।
कारुण्यान्वितमङ्गिसम्मतमतिभ्रान्तिप्रशान्तप्रियं
श्रीसङ्केतगृहं सदास्तविरहं पुण्यानुबन्धि स्फुटम् ॥ ४॥

श्रीचक्रेश्वरि ये स्तुवन्ति भवतीं भव्या भवद्भक्तयः
श्रीसर्वज्ञपदारविन्दयुगले विश्राममातन्वतीम् ।
भृङ्गीवत्सदृशां सुखं त्वसदृशं संप्रार्थयन्तो जना-
स्ते स्युर्ध्वस्तविपत्तयः सुमतयः स्पष्टं जितारातयः ॥ ५॥

श्रीचक्रेश्वरि नित्यमेव भवतीनामाऽपि ये सादरं
सन्तः सत्यशमाश्रिताः प्रतिपदं सम्यक् स्मरन्ति स्फुरत् ।

तेषां किं दुरितानि यान्ति निकटे नायाति किं श्रीर्गृहे
नोपैति द्विषतां गणोऽपि विलयं नाऽभीष्टसिद्धिर्भवेत् ॥ ६॥

श्रीचक्रेश्वरि ये भवन्ति भवतीपादारान्वेन्दाश्रिता-
स्ते भृङ्गा इव कामितार्थमधुनः पात्रं सदैवाङ्गिनः ।
जायन्ते जगति प्रतीतिभवनं भव्याः स्फुरत्कीर्त्तय-
स्तेषां क्वापि कदापि सा भवति नो दारिद्र्यमुद्रा गृहे ॥ ७॥

श्रीचक्रेश्वरि यः स्तवं तव करोत्युच्चैः स किं मानवः
कस्मादन्यजनाच्च याचत इह क्लेशैर्विमुक्ताशयः ।
कासश्वासशिरोगलग्रहकटीवातातिसारज्वर-
स्त्रोतोनेत्रगतामयैरपि न स श्रेयानिह प्रार्थते ॥ ८॥

श्रीचक्रेश्वरि शासनं जिनपतेस्तद्रक्षसि त्वं मुदा
ये केचिज्जिनभाषितान्यवितथात्युच्चैः प्रजल्पन्ति च ।
भव्यानां पुरतो हितानि कुरुषे तेषां तु तुष्टिं सदा
क्षुद्रोपद्रवविद्रवं प्रतिपदं कृत्वा कृतान्तादपि ॥ ९॥

श्रीचक्रेश्वरि विश्वविस्मयकरी त्वं कल्पवृक्षोपमा
धत्सेऽभीष्टफलानि वस्तुनिकृतिं दत्से विना संशयम् ।
तेन त्वं विनुता मयाऽपि भवती मत्वेति मन्निश्चयं
कुर्याः श्रीजनदत्तभक्तिषु मनो मे सर्वदा सर्वथा ॥ १०॥

इति श्रीजीनदत्तसूरिविरचितं श्रीचक्रेश्वरीस्तोत्रं सम्पूर्णम् ।

Proofread by DPD

*Shri Chakreshvaristotram*

pdf was typeset on March 31, 2019

Please send corrections to *sanskrit@cheerful.com*